Shemushi Sanskrit Class 9 Solutions Chapter 4 कल्पतरुः

अभ्यासः

प्रश्न 1.
एकपदेन उत्तरं लिखत –

(क) जीमूतवाहनः कस्य पुत्रः अस्ति?
(ख) संसारेऽस्मिन् कः अनश्वरः भवति?
(ग) जीमूतवाहनः परोपकारैकफलसिद्धये कम् आराधयति?
(घ) जीमूतवाहनस्य सर्वभूतानुकम्पया सर्वत्र किं प्रथितम्?
(ङ) कल्पतरुः भुवि कानि अवर्ष?
उत्तर:
(क) जीमूतवाहनस्य
(ख) परोपकारः
(ग) कल्पपादपम्
(घ) यशः
(ङ) वसूनि

प्रश्न 2.
अधोलिखितानां प्रश्नानाम् उत्तर: संस्कृतभाषया लिखित –

(क) कञ्चनपुरं नाम नगरं कुत्र विभाति स्म?
(ख) जीमूतवाहनः कीदृशः आसीत्?
(ग) कल्पतरोः वैशिष्ट्यमाकर्ण्य जीमूतवाहनः किम् अचिन्तयत्?
(घ) हितैषिणः मन्त्रिणः जीमूतवाहनं किम् उक्तवन्तः?
(ङ) जीमूतवाहनः कल्पतरुम् उपगम्य किम् उवाच?
उत्तर:
(क) कञ्चनपुर नाम नगर हिमवतः सानोपरि विभाति स्म।
(ख) जीमूतवाहनः महान् दानवीरः सर्वभूतानुकम्पी च आसीत्।
(ग) कल्पतरोः वैशिष्ट्यमाकर्ण्य जीमूतवाहनः अचिन्तयत् यत् "अहो! ईदृशम् अमरपादपं प्राप्यापि पूर्वैः पुरुषैअस्माकं तादृशं फलं किमपि न प्राप्तम्। किन्तु केवलं कैश्चिदेव कृपणैः कश्चिदपि अर्थः अर्थितः। तदहमस्मात् कल्पतरोः
अभीष्टं साधयामि" इति।
(घ) हितैषिणः मन्त्रिणः जीमूतवाहनं उक्तवन्तः-"युवराज! योऽयं सर्वकामदः कल्पतरुः तवोद्याने तिष्ठति स तव सदा पुज्यः। अस्मिन् अनुकूले स्थिते सति शक्रोऽपि अस्मान् बाधितुं न शक्नुयात्।"
(ङ) जीमूतवाहन: कल्पतरुम् उपगम्य उवाच-"देव! त्वया अस्मत्पूर्वेषाम् अभीष्टाः कामाः पूरिताः तन्ममैक कामं पूरय। यथापृथिवीम्

अदरिद्राम् पश्यामि तथा करोतु देव" इति।

प्रश्न 3.
अधोलिखितवाक्येषु स्थूलपदानि कस्मै प्रयुक्तानि?

(क) तस्य सानोरुपरि विभाति कञ्चनपुरं नाम नगरम्।
(ख) राजा सम्प्राप्तयौवनं तं यौवराज्ये अभिषिक्तवान्?
(ग) अयं तव सदा पूज्यः।
(घ) तात! त्वं तु जानासि यत् धनं वीचिवच्चञ्चलम्।
उत्तर:
(क) हिमवते (हिमालयाय)
(ख) राजपुत्राय (जीमूतवाहनाय)
(ग) कल्पतरवे
(घ) पित्रे (जीमूतकेतवे राज्ञे)

प्रश्न 4.
अधोलिखितानां पदानां पर्यायपदं पाठात् चित्वा लिखत –

(क) पर्वतः – ……
(ख) भूपतिः – ……
(ग) इन्द्रः – ……
(घ) धनम् – ……
(ङ) इच्छितम् – ……
(च) समीपम् – ……
(छ) धरित्रीम् – ……
(ज) कल्याणम् – ……
(झ) वाणी – ……
(ञ) वृक्षः – ……
उत्तर:
(क) पर्वतः – नगेन्द्रः
(ख) भूपतिः – राजा
(ग) इन्द्रः – शक्रः
(घ) धनम् – अर्थः
(ङ) इच्छितम् – अभीष्टम्/अर्थितः
(च) समीपम् – अन्तिकम्
(छ) धरित्रीम् – पृथ्वीम्
(ज) कल्याणम् – स्वस्ति/सुखम्
(झ) वाणी – वाक
(ञ) वृक्षः – तरुः

प्रश्न 5.
'क' स्तम्भे विशेषणानि 'ख' स्तम्भे च विशेष्याणि दत्तानि। तानि समुचित योजयत –

'क' स्तम्भ – 'ख' स्तम्भ

कुलक्रमागतः – परोपकारः

दानवीरः – मन्त्रिभिः

हितैषिभिः – जीमूतवाहनः

वीचिवच्चञ्चलम् – कल्पतरुः

अनश्वरः – धनम्

उत्तर:

'क' स्तम्भः – 'ख' स्तम्भः

कुलक्रमागत: – कल्पतरु:

दानवीर: – जीमूतवाहनः

हितैषिभिः – मन्त्रिभिः

वीचिवच्चञ्चलम् – धनम्

अनश्वरः – परोपकारः

प्रश्न 6.

स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत –

(क) तरोः कृपया सः पुत्रम् अप्राप्नोत्।

(ख) सः कल्पतरवे न्यवेदयत्।

(ग) धनवृष्ट्या कोऽपि दरिद्रः नातिष्ठत्।

(घ) कल्पतरुः पृथिव्यां धनानि अवर्षत्।

(ङ) जीवानुकम्पया जीमूतवाहनस्य यशः प्रासरत्।

उत्तर:

(क) कस्य

(ख) कस्मै

(ग) कया

(घ) कस्याम्

(ङ) कया

प्रश्न 7.

(अ) "स्वस्ति तुभ्यम्" स्वस्ति शब्दस्य योगे चतुर्थी विभक्तिः भवति। इत्यनेन नियमेन अत्र चतुर्थी विभक्तिः प्रयुक्ता एवमेव (कोष्ठकगतेषु पदेषु) चतुर्थी विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत –

(क) स्वस्ति ..... (राजा)

(ख) स्वस्ति ..... (प्रजा)

(ग) स्वस्ति ..... (छात्र)

(घ) स्वस्ति ..... (सर्वजन)

उत्तर:

(क) राज्ञे।

(ख) प्रजाभ्यः प्रजाये।

(ग) छात्राय/छात्रेभ्यः।

(घ) सर्वजनेभ्यः ।

प्रश्न 7.
(आ) कोष्ठकगतेषु पदेषु षष्ठी विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत –

(क) तस्य …… उद्याने कल्पतरुः आसीत्। (गृह)
(ख) सः …….. अन्तिकम् अगच्छत्।
(ग) …….. सर्वत्र यशः प्रथितम्
(जीमूतवाहन)
(घ) अयं ……..” तरु:?(किम्)
उत्तर:
(क) गृहस्य
(ख) पितुः
(ग) जीमूतवाहनस्य
(घ) कस्य

Class 9 Sanskrit Shemushi Chapter 4 कल्पतरुः Additional Important Questions and Answers

अतिरिक्त कार्यम्

प्रश्न 1.
निम्नलिखितम् अनुच्छेद पठित्वा तदाधारितानां प्रश्नानाम् उत्तर: लिखत –

1. अस्ति हिमवान् नाम सर्वरलभूमिः नगेन्द्रः। तस्य सानोः उपरि विभाति कञ्चनपुर नाम नगरम्। तत्र जीमूतकेतुः इति श्रीमान् विद्याधरपतिः वसति स्म। तस्य गृहोद्याने कुलक्रमागतः कल्पतरुः स्थितः। स राजा जीमूतकेतुः तं कल्पतरुम् आराध्य तत्प्रसादात् च बोधिसत्वांशसम्भवं जीमूतवाहनं नाम पुत्रं प्राप्नोत्। सः जीमूतवाहनः महान् दानवीरः सर्वभूतानुकम्पी च अभवत्। तस्य गुणः प्रसन्नः स्वसचिवैश्च प्रेरितः राजा कालेन सम्प्राप्तयौवनं तं यौवराज्ये अभिषिक्तवान्। कदाचित् हितैषिणः पितृमन्त्रिणः यौवराज्ये स्थितं तं जीमूतवाहनं उक्तवन्तः-“युवराज! योऽयं सर्वकामदः कल्पतरुः तवोद्याने तिष्ठति स तव सदा पूज्यः। अस्मिन् अनुकूले स्थिते सति शक्रोऽपि अस्मान् बाधितुं न शक्नुयात्” इति।

(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)

1. श्रीमतः विद्याधरपतेः किं नाम आसीत्?
2. स राजा कीदृशं पुत्रं प्राप्नोत्?
3. जीमूतकेतोः उद्याने कीदृशः कल्पतरुः स्थितः आसीत्?

उत्तर:

1. जीमूतकेतुः
2. बोधिसत्त्वांशसम्भवम्
3. कुलक्रमागतः

(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)

1. नृपस्य गृहीद्याने कः स्थितः आसीत्?

2. पुत्रः कीदृशः अभवत्?

उत्तर:

1. नृपस्य गृहोद्याने कुलक्रमागतः कल्पतरुः स्थितः आसीत्।
2. पुत्रः महान् दानवीरः सर्वभूतानुकम्पी च अभवत्।

(iii) भाषिककार्यम् (केवलं प्रश्नत्रयमेव)

1. अनुच्छेदे 'सम्पूज्य' इति पदस्य कः पर्याय: लिखितः?
2. अनुच्छेदे 'स राजा जीमूतकेतुः' इत्यस्य कर्तृपदस्य क्रियापदं किं वर्तते?
3. 'हितैषिभिः पितृमन्त्रिभिः' अनयोः पदयोः विशेषणपदं किम्?
4. अवसत्' इति पदस्य अर्थ किं पदं प्रयुक्तम्?

उत्तर:

1. आराध्य
2. प्राप्नोत्
3. हितैषिभिः
4. वसति स्म

2. एतत् आकण्यं जीमूतवाहनः अचिन्तयत्-"अहो ईदशम् अमरपादपं प्राप्यापि पूर्वः पुरुषैः अस्माकं तादशं फलं किमपि न प्राप्तम्। किन्तु केवलं कैश्चिदेव कृपणैः कश्चिदपि अर्थ: अर्थितः। तदहम् अस्मात् कल्पतरोः अभीष्ट साधयामि" इति। एवम् आलोच्य सः पितुः अन्तिकम् आगच्छत्। आगत्य च सुखमासीनं पितरम् एकान्ते न्यवेदयत्- "तात! त्वं तु जानासि एव बदस्मिन् संसारसागरे आशरीरम् इदं सर्व धनं वीचिवत् चञ्चलम्। एकः परोपकार एव अस्मिन् संसारे अनश्वरः यो युगान्तपर्यन्तं यशः प्रसूते। तद् अस्माभिः ईदृशः कल्पतरुः किमर्थ रक्ष्यते? पैश्च पूर्वरयं 'मम मम' इति आग्रहेण रक्षितः, ते इदानीं कुछ गताः? तेषां कस्यायम्? अस्य वा के ते? तस्मात् परोपकारैकफलसिद्धये त्वदाजया इमं कल्पपावपम् आराधयामि।

(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)

1. कः अन्तः अचिन्तयत्?
2. आशरीरमिदं सर्वधनं कीदृशं चञ्चलं वर्तते?
3. जीमूतवाहनः कस्य अन्तिकम् आगच्छत?

उत्तर:

1. जीमूतवाहनः
2. वीचिवत्
3. पितुः

(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)

1. तस्मात् कस्मै/किमर्थं नृपस्य आज्ञया जीमूतवाहनः कल्पपादपम् आराधयति?

2. कः एवास्मिन् संसारेऽनश्वरः यो युगान्तपर्यन्तं यशः प्रसूते।

उत्तर:

1. तस्मात् मनोरथम् अभीष्टम् साधयितुं नृपस्य आज्ञया जीमूतवाहनः कल्पपादपम् आराधयति।
2. परोपकारः एवास्मिन् संसारेऽनश्वरः यो युगान्तपर्यन्तं यशः प्रसूते।

(iii) भाषिककार्यम् (केवलं प्रश्नत्रयमेव)

1. अनुच्छेदे 'वृक्षम्' इत्यस्य पदस्य कः पर्यायः आगतः?
2. एतत् आकर्ण्य जीमूतवाहनः अचिन्तयत!।' अत्र कर्तृपदं किम्?
3. अनुच्छेदे 'गत्वा' इति पदस्य कः विपर्ययः लिखितः?
4. श्रुत्वा' 'इत्यर्थे किं पदं प्रयुक्तम्?

उत्तर:

1. पादपम्
2. जीमूतवाहनः
3. आगत्य
4. आकर्ण्य

3. अथ पित्रा 'तथा' इति अभ्यनुज्ञातः स जीमूतवाहनः कल्पतरुम् उपगम्य उवाच-'देव! त्वया अस्मत्पूर्वेषाम् अभीष्टाः कामाः पूरिताः, तन्ममैक काम पूरया यथा पृथिवीम् अवरिताम् पश्यामि तथा करोतु देव" इति। एवं वादिनि जीमूतवाहने "त्यक्तस्त्वया एषोऽहं यातोऽस्मि" इति वाक् तस्मात् तरोः उवभूत्। क्षणेन च स कल्पतरुः दिवं समुत्पत्य भुवि तथा वसूनि अवर्षत् यथा न कोऽपि दुर्गत आसीत्। ततस्तस्य जीमूतवाहनस्य सर्वजीवानुकम्पया सर्वत्र यशः प्रथितम्।

(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)

1. कः कल्पतरुम् उपगम्य उवाच?
2. क्षणेन सः कल्पतरुः किम् अवर्ष?
3. सः पृथिवी कीदृशीम् पश्यति?

उत्तर:

1. जीमूतवाहन:
2. वसूनि
3. अदरिद्राम्

(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)

1. जीमूतवाहने एवं वादिनि कीदृशी/का वाक् तस्मात् तरोः उदभूत?
2. जीमूतवाहनस्य सर्वजीवानुकम्पया किं अभवत्?

उत्तर:

1. जीमूतवाहने एवं वादिनि "त्यक्तस्त्वया एषोऽहं यातोऽस्मि" इति वाक् तस्मात् तरोः उदभूत्।
2. जीमूतवाहनस्य सर्वजीवानुकम्पया सर्वत्र यशः प्रथितम्।

(iii) भाषिककार्यम् (केवलं प्रश्नत्रयमेव)

1. 'अभीष्टाः कामाः' अनयोः पदयोः विशेष्यपदं किमस्ति?
2. अनुच्छेदे 'वृक्षात्' इत्यस्य पदस्य कः पर्यायः आगतः?
3. अनुच्छेदे 'अवर्षत्' इति क्रियापदस्य कर्तृपदं किमत्र प्रयुक्तम्?
4. 'अकथयत्' इत्यर्थे किं पदं प्रयुक्तम्?

उत्तर:

1. कामाः
2. तरोः
3. कल्पतरुः
4. उवाच

प्रश्न 2.
निम्नवाक्येषु रेखाङ्कित-पदानां स्थानेषु प्रश्नवाचकं पदं लिखत –

प्रश्न 1.
हिमवान् नाम सर्वरलभूमिः नगेन्द्रः अस्ति।
(क) क
(ख) केन
(ग) किम्
(घ) का
उत्तर:
(ग) किम्

प्रश्न 2.
तत्र जीमूतकेतुः इति विद्याधरः वसति स्म।
(क) कः
(ख) के
(ग) कानि
(घ) किम्
उत्तर:
(क) कः

प्रश्न 3.
तस्य गृहोद्याने कुलक्रमागतः कल्पतरुः स्थितः।
(क) कः

(ख) कथम्
(ग) कीदृशः
(घ) काः
उत्तर:
(ग) कीदृशः

प्रश्न 4.
सः महान् दानवीरः सर्वभूतानुकम्पी च अभवत्।
(क) का
(ख) कदा
(ग) काः
(घ) कस्मिन्
उत्तर:
(घ) कस्मिन्

प्रश्न 5.
तस्य गुणैः प्रसन्नः राजा तं यौवराज्ये अभिषिक्तवान्।
(क) कुत्र
(ख) के
(ग) कः
(घ) कदा
उत्तर:
(घ) कदा

प्रश्न 6.
स जीमूतवाहनः पितृमन्त्रिभिः उक्तः।
(क) केन
(ख) कैः
(ग) काभि
(घ) कीदृशः
उत्तर:
(ख) कैः

प्रश्न 7.
अयं कल्पतरुः तव सदा पूज्यः।
(क) कः
(ख) काः
(ग) का
(घ) किम्
उत्तर:
(घ) किम्

प्रश्न 8.

एतत् आकर्ण्य जीमूतवाहनः अन्तः अचिन्तयत्।
(क) कुत्र
(ख) कः
(ग) केन
(घ) कान्
उत्तर:
(क) कुत्र

प्रश्न 9.
किन्तु केवलं कैश्चिदेव कृपणैः कश्चिदपि अर्थः अर्थितः।
(क) काः
(ख) का
(ग) क;
(घ) काः
उत्तर:
(ग) क;

प्रश्न 10.
तद् अहम् अस्मात् अभीष्टं मनोरथं साधयामि।
(क) किम्
(ख) कम्
(ग) काम्
उत्तर:
(ख) कम्

प्रश्न 11.
एवम् आलोच्य सः पितुः अन्तिकम् आगच्छत्।
(क) कस्य
(ख) का
(ग) कदा
(घ) कः
उत्तर:
(क) कस्य

प्रश्न 12.
अस्मिन् संसारसागरे सर्वधनं वीचिवत् चञ्चलम्।
(क) कुत्र
(ख) किम्
(ग) केन
(घ) कान्
उत्तर:
(ख) किम्

प्रश्न 13.
सः जीमूतवाहनः कल्पतरुम् उपगम्य उवाच।
(क) किम्
(ख) कीदृशः
(ग) कम्
(घ) कः
उत्तर:
(ग) कम्

प्रश्न 14.
यथा पृथ्वीम् अदरिद्रां पश्यामि।
(क) काम्
ख) केन
(ग) का
(घ) कीदृशः
उत्तर:
(क) काम्

प्रश्न 15.
इति वाक् तस्मात् तरोः उदभूत्।
(क) कस्मात्/कुत:
(ख) किम्
(ग) कथम्
(घ) कुत्र/कस्याम्
उत्तर:
(क) कस्मात्/कुत:

प्रश्न 16.
सः कल्पतरुः दिवं समुत्पत्य भुवि वसूनि अवर्षत्।
(क) केन
(ख) कानि
(ग) के
(घ) कुत्र/कस्याम्
उत्तर:
(घ) कुत्र/कस्याम्

प्रश्न 17.
तस्य सर्वजीवानुकम्पया सर्वत्र यशः प्रथितम्।
(क) कया
(ख) कः
(ग) किम्
(घ) काभि
उत्तर:

(क) कया

प्रश्न 18.
त्वया अस्मात् पूर्वेषाम् अभीष्टाः कामाः पूरिताः।
(क) कान्
(ख) केषाम्
(ग) कदा
(घ) केन
उत्तर:
(ख) केषाम्

प्रश्न 19.
त्वया त्यक्तः एषोऽहं यातोऽस्मि।
(क) कीदृशः
(ख) कैः
(ग) किम्
(घ) केन
उत्तर:
(घ) केन

प्रश्न 3.
निम्नवाक्यानि घटनाक्रमानुसार पुनर्लिखत –

प्रश्न 1.

1. कञ्चनपुरस्य नगरस्य राजा जीमूतकेतुः आसीत्।
2. एकदा तस्य नृपस्य मन्त्रिणः कथितवन्तः।
3. हे युवराज! अयं कामदः कल्पतरुः सर्वैः फूज्यः वर्तते।
4. नृपस्य पुत्र: जीमूतवाहनः महान् दानवीरः सर्वभूतानुकम्पी च अभवत्।
5. एकदा सः पितरम् उपगम्य अवदत्-हे पितः! अहम् एतं कल्पतरुं परोपकाराय आराधयामि।
6. नृपः सचिवानां परामर्शण पुत्रं यौवराज्येऽभिषिक्तवान्।
7. अस्मिन् अनुकूले स्थिते शक्रोऽपि अस्मान् बाधितुं न शक्यते।
8. तस्य गृहोद्याने कुलक्रमागतः एकः कल्पतरुः स्थितः आसीत्।

उत्तर:

1. कञ्चनपुरस्य नगरस्य राजा जीमूतकेतुः आसीत्।
2. तस्य गृहोद्याने कुलक्रमागतः एकः कल्पतरुः स्थितः आसीत्।
3. नृपस्य पुत्रः जीमूतवाहनः महान् दानवीरः सर्वभूतानुकम्पी च अभवत्।
4. नृपः सचिवानां परामर्शण पुत्रं यौवराज्येऽभिषिक्तवान्।
5. एकदा तस्य नृपस्य मन्त्रिणः कथितवन्तः।
6. हे युवराज! अयं कामदः कल्पतरुः सर्वैः पूज्यः वर्तते।
7. अस्मिन् अनुकूले स्थिते शक्रोऽपि अस्मान् बाधितुं न शक्यते।

8. एकदा सः पितरम् उपगम्य अवदत्-हे पितः! अहम् एतं कल्पतरुं परोपकाराय आराधयामि।

प्रश्न 2.

1. पुत्रः जीमूतवाहनः कल्पतरुम् आराध्य अकथयत्।
2. क्षणेन सः कल्पतरुः दिवम् उत्पत्य भुवि वसूनि अवर्षत्।।
3. हे देव! यथा पृथ्वीम् अदरिद्रां पश्यामि तथा भवान् करोतु इति।
4. त्वया अस्मत् पूर्वेषाम् अभीष्टाः कामाः पूरिताः तत् मम अपि एका कामना पूरय।
5. तरु: जीमूतवाहनम् अवदत्-" त्वया त्यक्तः अहं गच्छामि इति"।
6. जीमूतवाहनस्य यशः सर्वत्र प्रथितम्।
7. तस्य पुत्रः जीमूतवाहनः अतीव महान् दानवीरः सर्वभूतानुकम्पी च आसीत्।
8. हिमालये कञ्चनपुर नगरस्य राजा जीमूतकेतुः विद्याधरपतिः आसीत्।

उत्तर:

1. हिमालये कञ्चनपुर नगरस्य राजा जीमूतकेतुः विद्याधरपतिः आसीत्।
2. तस्य पुत्रः जीमूतवाहनः अतीव महान् दानवीरः सर्वभूतानुकम्पी च आसीत्।
3. पुत्रः जीमूतवाहनः कल्पतरुम् आराध्य अकथयत्।
4. हे देव! यथा पृथ्वीम् अदरिद्रां पश्यामि तथा भवान् करोतु इति।
5. त्वया अस्मत् पूर्वेषाम् अभीष्टाः कामाः पूरिताः तत् मम अपि एका कामना पूरय।
6. तरु: जीमूतवाहनम् अवदत्-"त्वया त्यक्तः अहं गच्छामि इति"।
7. क्षणेन सः कल्पतरुः दिवम् उत्पत्य भुवि वसूनि अवर्षत्।
8. जीमूतवाहनस्य यशः सर्वत्र प्रथितम्।

प्रश्न 3.
निम्न 'क' वर्गीय पदानाम् 'ख' वर्गीय पदेषु पर्यायमेलनम् –

'क' वर्ग: – 'ख' वर्ग:

1. सानोः – प्रसिद्धम्
2. प्रथितम् – याचितः
3. वसूनि – समीपम्
4. अर्थितः – इन्द्रः
5. अन्तिकम् – अनुमतः
6. शक्रः – धनानि
7. यौवराज्ये – शिखरस्य
8. अभ्यनुज्ञातः – युवराजपदे

उत्तर:

1. – शिखरस्य
2. – प्रसिद्धम्
3. – धनानि

4. – याचितः
5. – समीपम्
6. – इन्द्रः
7. – युवराजपदे
8. – अनुमतः

प्रश्न 4.
'क' स्तम्भे विशेषणानि 'ख' स्तम्भे विशेष्याणि दत्तानि। तानि समुचित योजयत –

'क' स्तम्भ – 'ख' स्तम्भ

1. अभीष्टाः – पृथ्वीम्
2. अदरिद्राम् – कामम्
3. एकम् – राजा
4. प्रसन्नः – सः
5. पूज्यः – कल्पतरुः
6. सर्वकामदः – कामाः
7. वादिनि – तरोः
8. तस्मात् – जीमूतवाहने

उत्तर:

1. – कामाः
2. – पृथ्वीम्
3. – कामम्
4. – राजा
5. – सः
6. – कल्पतरुः
7. – जीमूतवाहने
8. – तरोः

प्रश्न 5.

निम्न 'क' वर्गीय पदानां 'ख' वर्गीय पदेषु विपर्ययचयनं कुरुत –

'क' पदानि – 'ख' विपर्ययाः